कुक्कुटी। सूकरी[1]। ब्राह्मणी। वृषली। नाडायनी। चारायणी। कठी। बह्वृची। जातेः इति किम्? मुण्डा। अस्त्रीविषयात् इति किम्? [2]मक्षिका। अयोपधात् इति किम्? [3]क्षत्रिया।

[३६७] योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः। (म.भा.२.२२६)

हयी। गवयी। मुकयी। मत्सी। मनुषी॥

## पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। (६४/५१९)

पाकाद्युत्तरपदात् [4]जातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति। स्त्रीविषयत्वादेतेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोबाली। पुष्पफल मूलोत्तरपदात्तु यतो नेष्यते तदजादिषु पठ्यते, 'सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्' (ग.सू.५३), 'सम्भस्त्राजिन-शणपिण्डेभ्यः फलात्' (ग.सू.५४), 'मूलान्नञः' (ग.सू.५५) इति[5]॥

## इतो मनुष्यजातेः। (६५/५२०)

इकारान्तात् प्रातिपदिकात् मनुष्यजातिवाचिनः स्त्रियां ङीष् प्रत्ययो भवति। अवन्ती। कुन्ती। दाक्षी। प्लाक्षी। इतः इति किम्? [6]विट्। दरत्। मनुष्यग्रहणं किम्? [7]तित्तिरिः। जातेः इति वर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात्। [8]औदमेयी (म.भा. २. २२६)।

[३६८] इञ उपसङ्ख्यानमजात्यर्थम्। (म.भा.२.२२६)

सौतङ्गमी। मौनचित्ती। सुतङ्गमादिभ्यश्चातुरर्थिक इञ् न जातिः॥

## ऊङुतः। (६६/५२१)

मनुष्यजातेः इति वर्तते। उकारान्तात् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियाम् ऊङ प्रत्ययो भवति। कुरूः। ब्रह्मबन्धूः। [9]वीरबन्धूः। ङकारो 'नोङधात्वोः' (६.१.१७५/३७२१) इति विशेषणार्थः। दीर्घो-च्चारणं कपो बाधनार्थम्। अयोपधात् इत्येतदत्रापेक्ष्यते। अध्वर्युर्ब्राह्मणी।

[३६९] अप्राणिजातेश्चारज्ज्वादीनाम्[10] इति वक्तव्यम्। (म. भा. २. २२६)

अलाबूः। कर्कन्धूः। अप्राणिग्रहणं किम्? कृकवाकुः। अरज्ज्वादीनाम् इति किम्? [11]रज्जुः। हनुः॥

## बाह्वन्तात् सञ्ज्ञायाम्। (६७/५२२)

बाहुशब्दान्तात् प्रातिपदिकात् सञ्ज्ञायां विषये स्त्रियाम् ऊङ प्रत्ययो भवति। [12]भद्रबाहूः। [13]जालबाहूः। सञ्ज्ञायाम् इति किम्? वृत्तौ बाहू[14]अस्याः वृत्तबाहुः॥

---

1. मयूरी इत्यधिकम् न्या. 2. बलाका इ. ब. क. ड, पिपीलिका ह. 3. वेश्या क, इभ्या फ. ह. 4. जातिवचनात् ह. 5. जातेरित्येव इत्यधिकम् इ.क.ड.ह. 6. इट् क. 7. तित्तिरिरियम् ह. 8. उदमेयस्य अपत्यं इत्यधिकम् ग, औदनेमी ब. 9. नास्ति फ, जीवबन्धूः ब. क. 10. उपसर्जनम् इत्यधिकम् फ. 11. तनुः क. 12. भद्र–वृत्तबाहुः नास्ति ब, मद्रबाहूः ड. ह, स्थूलबाहूः क. 13. नास्ति फ. 14. यस्याः ड, यस्याः सा क.